# अभिज्ञानशाकुन्तले समाजव्यवस्था

**डॉ. निरञ्जनसाहुः**
प्राचार्यः - प्राच्य विद्यापीठम् एवम् उच्चाध्ययनसंस्थानम्, शाहपुरा
सेवानिवृत्तः, प्राचार्यः, सास्कृतशिक्षाविभागः
०९, विद्याविहारः, कायडमार्गः, अजमेरम्, राजस्थानम्।

महाकविषु महाकविकालिदासः श्रेष्ठः। ध्वन्यालोककारेणानन्दवर्धनेन प्रोक्तं यत्- येनास्मिन्नकविपरम्परावाहिनि संसारे कालिदासप्रभृतय: महाकवयो द्वित्राः पञ्चषा एव वा महाकवय इति गण्यन्ते। अस्य महाकवेः प्रशंसायां लौकिकोऽयं श्लोक : लोके प्रसिद्धः। महाकविषु कविकालिदासः प्रशस्यतमः।

पुष्पेषु जाति: नगरीषु काशी नदीषु गङ्गा नृवरेषु रामः।
नारीषु रम्भा पुरुषेषु विष्णुः काव्येषु माघ; कविकालिदासः॥

पाठभेदा: दृश्यन्ते - पुष्पेषु चम्पा नगरीषु लङ्का। पुष्पेषु मल्ली नगरीषु दिल्ली इति।

पुरा कवीनां गणनाप्रसंगे कनिष्ठिकाधिष्ठितः कालिदासः।
अद्यापि तत्तुल्य कवेरभावादनामिका सार्थवती बभूव।।

वस्तुतः अद्यापि संस्कृतजगति कालिदासेन समः कविः न विद्यते अतः अङ्गुलीषु अनामिकाङ्गुलीनाम सार्थकं सञ्जातम्।

अस्य कवेः सप्तरचनासु अभिज्ञानशाकुन्तलं सर्वश्रेष्ठम्। अतः विद्वद्भिः भणितं यत्

**"कालिदासस्य सर्वस्वमभिज्ञानशाकुन्तलम्। तत्रापि च चतुर्थोऽङ्कस्तत्र श्लोकचतुष्टयम्"** पुनश्च विदुषां मनसि नाटकनामस्मरणमात्रेणैव श्लोकोऽयं मानसपटले स्वतः परिस्फुरति यत् -

**काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला, तत्र रम्यश्चतुर्थोऽङ्कस्तत्र श्लोकचतुष्टयम्।**

नाटकेऽस्मिन् महाभारतस्य आदिपर्वणः शकुन्तलोपख्यानकथा विद्यते। अत्र नायक: महाराज : दुष्यन्तः, नायिका च शकुन्तला। रसः शृङ्गारः। अस्य नाटकस्य व्युत्पतिः यथा-

१- अभिज्ञायते अनेन इति अभिज्ञानम्। अभि + ज्ञा + ल्युट् शकुन्तलामधिकृत्य कृतं नाटकम् अभिज्ञानशाकुन्तलम्।

२- अभिज्ञानप्रधानं शाकुन्तलम् अभिज्ञानशाकुन्तलम्। शाकपाथर्विादीनां सिद्धये उत्तरपदलोपस्योङ्ख्यानम्।

३- अभिज्ञानसहितं शाकुन्तलम् अभिज्ञानशाकुन्तलम्। उत्तरपदे सहितस्य लोपः.

४- अभिज्ञानस्मृतं च तत् शाकुन्तलं च इति अभिज्ञानशाकुन्तलम्।

५- अभिज्ञानेन स्मृता अभिज्ञानस्मृता। अभिज्ञानस्मृता शकुन्तला यस्मिन् नाटके तदभिज्ञानशाकुन्तलम्।

६- अभिज्ञानेन इति मुद्रिकया ज्ञाता स्मृता शकुन्तला। शकुन्तलामधिकृत्य कृतं नाटकम् अभिज्ञानशाकुन्तलम्।

अस्य प्रसिद्धस्य नाटकस्य समाजे महान् प्रभावः दृश्यते। समाजः सम् अज् घञ्। समूहः। अज्-गतौ। ये गत्यर्थकधातवः ते ज्ञानार्थकाः भवन्ति। यस्मात् सम्यक् ज्ञानं लभते सः समाज इति ज्ञातव्यः। अत्र प्रश्नः ? केषां समाजः ? मनुष्याणां समाजः। नाटकमिदं मनुष्यसमाजस्य कृते मार्गदर्शकं विद्यते।

**१. प्राणिहिंसा न करणीया।**

प्रथमोऽङ्के महाराजदुष्यन्तस्य मृगस्योपरि बाणक्षेपणस्य आश्रमवासिभिः विरोधः कृतः। आश्रममृगोऽयं न हन्तव्यः न हन्तव्यः।

**न खलु न खलु बाणः सन्निपात्योऽयमस्मिन्, मृदुनि कुसुमशरीरे पुष्पराशाविवाग्निः। १ / १०**

**२. स्वाभाविकसौन्दर्यस्य महत्त्वम्-**

शकुन्तलायाः स्वाभाविकसौन्दर्यम्-

**सरसिजनमनुविद्धं शैवलेनापि रम्यम्, मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।**
**इयमधिकमनोज्ञा वल्कलेनापि तन्वी, किमिव हि मधुराणां मण्डनं नाकृतीनाम्।। १ / १८**

एषा शकुन्तला मुनिकन्या सत्यपि रमणीया प्रतिभाति। इयं कन्या वल्कलेनापि मनोहारिणी दृश्यते। महाकविः अर्थान्तरन्यासालंकारेण वर्णयति यत्- मधुराणाम् आकृतीनां मण्डनं न अर्थात् भूषणस्यावश्यकता नास्ति। वस्तुतः यत् स्वाभाविकरमणीयं तत् रमणीयं भवत्येव तत्र मण्डनस्य ॥वश्यकता न भवति। यथा चन्द्रः कलङ्केन मलिनः सन्नपि शोभां विस्तारयति। अतः वक्तुं शक्यते रम्याणां सर्वमेव मण्डनमेव भवति।

शकुन्तलां प्रति प्रेमासक्तः सन् राजा तथा अनसूयामुखात् शकुन्तलायाः जन्मकथां श्रुत्वा पुनः भणति -

**मानुषीषु कथं वा स्यादस्य रूपस्य सम्भवः। न प्रभातरलं ज्योतिरुदेति वसुधातलात्।। १/२२**

मानवलोकस्त्रीषु एतादृशं सौन्दयं न सम्भवति। वस्तुतः अनुपमा सुन्दरी शकुन्तला एवास्ति। यथा कान्तिमती ज्योतिः वसुधातलात् न उदेति।

प्रियम्वदा वदति- प्रत्येकं युवत स्वानुरूपं वरं वृणुते - यथा वनज्योत्स्ना अनुरूपेण पादपेन सङ्गता अपि नाम एवम् अहमपि आत्मनः अनुरूपं वरं लभेय।

३- चतुथोऽङ्के अनसूया-प्रियम्वदयोः वार्तालापे शकुन्तला - दुष्यन्तयोः मेलने तातः कश्यपः किं चिन्तयिष्यति?

**अनसूया भणति-**

**गुणवते कन्यका प्रतिपादनीया इति अयं तावत् प्रथमः सङ्कल्पः । तत् यदि दैवं संपादयति ननु अप्रयासेन कृतार्थ : गुरुजनः।**

महाकविः कालिदासः समाजाय उपदिशति यत् गुणवते चरित्रवते वराय कन्या प्रदेया। इति मातापित्रोः अयं प्रथमः संकल्पो भवति। यदि एतत् कार्यं दैव:भाग्यं संपादयति। तर्हि परिवारजनाः सुखिनः भवन्ति । अत्र भाग्येन शकुन्तलादुष्यन्तयोः मेलनं संजातम्। अनेन महर्षिकण्वस्य कृते आनन्दस्य विषयः। अवश्यं सः प्रसन्नो भविष्यति।

**४- गान्धर्वविवाहः-**

तृतीयेऽङ्के शकुन्तला मेलनाद् बिभेति

शकुन्तला - पौरव, रक्ष विनयम्। मदनसंतप्ताऽपि न खल्वात्मनः प्रभवामि।

राजा – भीरु, अलं गुरुजनभयेन। दृष्ट्वा ते विदितधर्मा तत्र भवान्नात्र दोषं ग्रहीष्यति कुलपतिः।

अपि च —

**गान्धर्वेण विवाहेन बह्व्यो राजर्षिकन्यकाः। श्रूयन्ते परिणीतास्ताः पितृभिश्चानुमोदिताः।। ३ / २०**

**५- अतिथिसेवा-**

अतिथिसेवा अस्माकं प्रमुखं कत्तव्यम्। उपनिषदि प्रोक्तम् अतिथिदेवो भव। अतिथिः देवसदृशः भवति। सर्वादौ तस्य सेवा करणीया। अत्र नाटके चतुर्थेऽङ्के दुर्वासामहर्षेः सेवां शकुन्तला न कृतवती। एष: दुर्वासाः सुलभकोपो महर्षिः। तथा शप्त्वा वेगबलोत्फुल्लतया दुर्वारया गत्या प्रतिनिवृत्तः।

आः अतिथिपरिभाविनि !

**विचिन्तयन्ती यमनन्यमानसा, तपोधनं वेत्सि न मामुपस्थितम्।**
**स्मरिष्यति त्वां न स बोधितोऽपि सन्, कथां प्रमत्तः प्रथमं कृतामिव। ४ / १**

६- दुष्यन्त:- अपि नाम कुलपतेरियमसवर्णक्षेमा स्यात्-

**असंशयं क्षत्रपरिग्रहक्षमा, यदार्यमस्यामभिलाषि मे मनः।**
**सतां हि सन्देहपदेषु वस्तुषु, प्रमाणमन्त:करणप्रवृत्तयः ।। १/२०**

विदूषकः- तत् खलु **रमणीयं नाम** यत् भवतः अपि विस्मयम् उत्पादयति।

**अनाघ्रातं पुष्पं किसलयमलूनं कररुहै-रनाविद्धं रत्नं मधु नवमनास्वादितरसम्।**
**अखण्डं पुण्यानां फलमिव न तद्रूपमनघं न जाने भोक्तारं कमिह समुपस्थास्यति विधि :।। २ / १०**

**७- करग्रहणम् –**

विदूषकः - नीवारषष्ठभागम् अस्माकम् उपहरन्तु-

दुष्यन्तः - **यदुत्तिष्ठति वर्णेभ्यो नृपाणां क्षयि तत्फलम्।**
**तपःषड्भागमक्षय्यं ददत्यारण्यका हि नः ।। २/१३**

ब्राह्मणादिवर्णेभ्यः यत् कररूपेण आगच्छति तत् फलं नश्वरमस्ति परन्तु अरण्यवासिनः मुनयः अस्मभ्यमविनश्वरमेव मुनीनां तपसः षड्भागं एव ददति - अर्थात् मुनीभ्यः ऋषिभ्यः कदापि करः न ग्रहणीयः - एतत् अक्षयं भवति।

**८- नृपस्य प्रतिष्ठाद्वयम्-**

**परिग्रहबहुत्वेऽपि द्वे प्रतिष्ठे कुलस्य मे। समुद्ररशना चोर्वी सखी च युवयोरियम्।।**

मम कुलस्य प्रतिष्ठाद्वयम् एका - सागरमेखला पृथिवी, द्वितीया – एषा शकुन्तला।

**९- अथवा लोकतन्त्राधिकार :**

**भानुसकृद्युक्ततुरङ्ग एव, रात्रिन्दिवं गन्धवहः प्रयाति।**
**शेष : सदैवाहितभमिभारः, षष्ठांशवृत्तेरपि धर्म एषः ।। ५ / ४**

**१०- सुखानि दुःखानि चक्रवत् परिवर्तन्ते - प्रभातवर्णना-**

**यात्येकतोऽस्तशिखरं पतिरोषधीनामाविष्कृतोऽरुणपुर : सर एकतोऽर्कः।**
**तेजोद्वयस्य युगपद् व्यसनोदयाभ्यां, लोको नियम्यत इवात्मदशान्तरेषु ।।**

**सुखदुःखयोः समभावः भवितव्यः।**

प्रियंवदा - सुशिष्यपरिदत्ता इव विद्या अशोचनीया असि मे संवृत्ता।

**शकुन्तलाप्रसंगे**

**दुष्यन्तेनाहितं तेजो दधाना भूतये भुवः। अवेहि तनया ब्रह्मन्नग्निगर्भा शमीमिव।। ४/४**

विवाहितापुत्री बहुकालपर्यन्तं पितृगृहे न स्थापनीया। पतिगृहं सा यथाकालं प्रेषणीया।

**११- गृहस्थाश्रमव्यवस्था-**

काश्यपः - **यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया,**
**कण्ठः स्तम्भितवाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम्।**
**वैक्लव्यं मम तावदीदृशमहो स्नेहादरण्यौकसः,**
**पीड्यन्ते गृहिणः कथं नु तनयाविश्लेषदु : खैर्नवैः।। ४ / ६**

**पुत्री - वियोगे गृहिणः सुतरां दुःखिताः भवन्ति।**

शकुन्तलायाः पतिगृहगमने अरण्यपरिवेशः शोकाकुलः इति कविः वर्णयति-

**उद्गलितदर्भकवला : मृगाः, परित्यक्तनर्तना मयूराः।**
**अपसृतपाण्डुपत्राः मुञ्चन्ति अश्रु इव लताः।। ४ / १२**

**१२- समाजं प्रति पर्यावरणसंरक्षणाय सन्देश :-**

प्रथमोऽङ्के अनसूया शकुन्तलां वदति - हला शकुन्तले ! त्वत्तोऽपि तातकाश्यपस्याश्रमवृक्षकाः प्रियतरा इति तर्कयामि। येन नवमालिकाकुसुमपेलवाऽपि त्वमेतेषामालवालपूरणे नियुक्ता।

शकुन्तला - न केवलं तात नियोग एव। अस्ति मे सोदरस्नेहोऽप्येतेषु।

इतोऽनुमीयते यत् पादपेषु लतासु च महान् स्नेहः।

**पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या, नादत्ते प्रियमण्डनापि भवता स्नेहेन या पल्लवम्।**
**आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः, सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्।। ४/९**

अत्र वृक्षाणां छेदः न करणीयः। कुसुमप्रसूतिसमये जन्मोत्सवः परिपाल्यते। इति संदेशः। उत्सवप्रियो हि लोकः।

१३- तत्र परिग्रहीता दुष्यन्तः समुपस्थितः नास्ति, अतः शकुन्तलां पतिगृहं प्रति प्रापयतः शिष्यस्य शाङ्गरवस्य माध्यमेन दुष्यन्तं प्रति स्वसंदेशं प्रेषयति भगवान् कण्वः-

**अस्मान् साधु विचिन्त्य संयमधनानुच्चैः कुलं चात्मनः,**
**स्त्वय्यस्याः कथमप्यबान्धवकृतां स्नेहप्रवृत्तिं ताम्।**
**सामान्य प्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया,**
**भाग्यायत्तः परं न खलु तद्वाच्यं वधूबन्धुभिः।। ४/१७**

तपस्विनां निश्छलतां, आत्मनः उच्चकुलं, ममानुमतिं विना, अस्याः स्नेहप्रवृत्तिं सम्यक् विचार्य अन्यदारैः सह यथा व्यवहारः भवता क्रियते तथा व्यवहार : अनया शकुन्तलया समं भवता करणीयः एव। ततः परं भाग्यायात्तं सर्वमिति भाव्यम्। विषयेऽस्मिन् वधूबन्धुभिः सह चर्चा न करणीयाः। विषयेऽस्मिन् मम न कापि आपत्तिः भविता।

१४- कण्वमुनिः वनवासी तपस्वी सन्नपि लौकिकज्ञः आसीत्।

काश्यपः - शकुन्तलां विलोक्य। वत्से ! त्वमिदानीमनुशासनीयासि। वनौकसोऽपि सन्तो लोकिकज्ञाः वयम्।

पतिकुले त्वया कीदृशः व्यवहार : करणीय :-

**शुश्रूषस्व गुरून् कुरु, प्रियसखीवृत्तिं सपत्नीजने,**

**भर्तुर्विप्रकृतापि रोषणतया मास्म प्रतीपं गमः ।**

**भूयिष्ठं भव दक्षिणा परिजने, भाग्येष्वनुत्सेकिनी,**

**यान्त्येवं गृहिणीपदं युवतयो वामा कुलस्याधयः ।। ४/१८**

संसारे एतादृश:व्यवहारः स्याच्चेत् संयुक्तपरिवारा: अभविष्यन्। समाजं प्रति संयुक्तपरिवाराय संदेश :। सख्यौ- यदि नाम स: राजा प्रत्यभिज्ञामन्थरः भवेत् तदा तस्मै इदम् आत्मनाभिधेयाङ्कितम् अङ्गुलीयकं दर्शय स्नेहः पापशङ्की।

१५- **वानप्रस्थाश्रमः-**

शकुन्तला- तातः! कदा नु भूयः तपोवनं प्रेक्षिष्ये।

**भूत्वा चिराय चतुरन्तमहीसपत्नी, दौषन्तिमप्रतिरथं तनयं निवेश्य ।**

**भर्त्ता तदर्पितकुटुम्बभरेण सार्धम्, शान्ते करिष्यसि पदं पुनराश्रमेऽस्मिन् ।। ४/२०**

शिवास्ते पन्थानः सन्तु।

१६- **अर्थो हि कन्या परकीय एव, तामद्य संप्रेष्य परिग्रहीतुः ।**

**जातो ममायं विशद : प्रकामं, प्रत्यर्पितन्यास इवान्तरात्मा ।।४ / २२**

कन्यादानम् – कन्यायै दानम्।

१७- **परोपकार :-**

**भवन्ति नम्रास्तरवः फलागमै- र्नवाम्बुभिर्दूरविलम्बिनो घनाः ।**

**अनुद्धताः सत्पुरुषाः समृद्धिभिः, स्वभाव एवैष परोपकारिणाम् ।। ५/१२**

१८- **विवाहात् पूर्वं सहवासः न करणीयः । समाजं प्रति संदेश :-**

**अत: परीक्ष्य कर्तव्यं विशेषात् संगतं रहः । अज्ञातहृदयेष्वेव वैरीभवति सौहृदम् ।। ५/२४**

१९- शारद्वत: वदति राजानं प्रति - पत्न्याः उपरि पत्युः अधिकारो विद्यते। श्वसुरालये स्थातव्यम्।

**तदेषा भवतः कान्ता त्यज वैनां गृहाण वा । उपपन्ना हि दारेषु प्रभुता सर्वतोमुखी ।। ५ / २६**

२० - संसारे कुत्र कथं व्यवहारः आचरणीयः।

**प्राणानामनिलेन वृत्तिरुचिता सत्कल्पवृक्षे वने, तोये काञ्चनरेणुकपिशे धर्माभिषेकक्रिया ।**

**ध्यानं रत्नशिलातलेषु विबुधस्त्रीसन्निधौ संयमो, यत्काङ्क्षन्ति तपोभिरन्यमुनयस्तस्मिंस्तपस्यन्त्यमी ।। ७ / १२**

२१- मारीचस्य आशीर्वादवाक्यम्- राजानं प्रति-

**दिष्ट्या शकुन्तला साध्वी सदपत्यमिदं भवान्। श्रद्धा वित्तं विधिश्चेति त्रितयं तत् समागरम्।। ७ / २९**